UGC Approved Journal No. 40920

ISSN 2277-6443

सप्तमोऽङ्कः, 2018-19



विश्वविद्यालयानुदानायोगद्वारा स्वीकृतशोधपत्रिकासूच्यन्तर्गता

# विद्यारश्मिः

समीक्षिता मूल्याङ्किता च वार्षिकी राष्ट्रियशोधपत्रिका

**A Peer Reviewed Refereed Annual National Research Journal**

वेदर्चामर्चयन्तस्स्मृतिचयवचनं तत्त्वतश्चर्चयन्तः,
शास्त्रान्तःसंस्पृशन्तोऽमृतगतिमतिदं दर्शनं दर्शयन्तः ।
साहित्यं स्वादयन्तस्सहृदयवसतौ भासमुद्भासयन्तो
विद्याया रश्मयो ज्ञान् पिपुरतु सुधियां शेमुषीमेधयन्तः ॥

**प्रधानसम्पादकः**

प्रो. सुदेशकुमारशर्म्मा

**सम्पादकः, संयोजकश्च**

प्रो. बोधकुमारझाः

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः)

**क.जे. सोमैयासंस्कृतविद्यापीठम्**

विद्याविहारः, मुम्बई - 77

# रसानां सुखदुःखात्मकत्वं

✍प्रो. अर्चना दुबे

(रसस्तावत्त्रिविधः । काव्यरसो (मनोनिष्ठः) विषयरसो (अन्तःकरणनिष्ठो) ब्रह्मरसश्च (आत्मनिष्ठः) । तेषु काव्यरसोऽत्र प्रतिपाद्यः । तत्रायं रसः सुखात्मक एवेति बहवः । उभयात्मकः, तत्र केषुचित्कस्यचित् प्राधान्यं गौणत्वं वेत्यभिनवगुप्ताचार्याः । केषाञ्चिद् दुःखात्मकत्वं, केषाञ्चिच्च सुखात्मकत्वमिति नाट्यदर्पणकृतोर्मतम्, अन्यैरपि कैश्चित् समर्थितम् । शोधपत्रमिदं तेषां समेषां मतं सम्यगुपपाद्य नाटयदर्पणकृन्मते श्रद्दधातीति लेखादस्मात् प्रत्येति। तत्रेदं विभावनीयम् - काव्यरसस्य लोकोत्तरत्वं ब्रह्मानन्दसहोदरत्वञ्चेति कश्चन सम्प्रदायः । तस्माद् विषयरसदर्शनाद् ब्रह्मरसदर्शनाच्चास्य भेदो नूनं विज्ञेयः । न च सहोदरत्वमित्युक्ते ब्रह्रसकाव्यरसयोः अभेद इति वाच्यम्, सर्वथा स्वीकृतेऽभेदे सहोदरत्वानुपपत्तेः, एकत्वादिपदानुक्तेश्च । सहोदरे स्वजनकजन्यत्वम् एकोदरशायित्वं वा सम्बन्धः । स च भेदे सति सम्बन्धः, सहोदरे रूपस्वभावादीनां तुल्यत्वानुभवात्। तस्मात् काव्यरसः किमात्मकः इति विचारे तत्र विषयरसस्य, ब्रह्मरसस्य च वासना उच्छेद्या । सत्येवमुच्छेदे एव तद्रसपरिचयोऽवाप्तुं शक्यः । तथाहि - न हि सुखं दुःखैर्विना लभ्यते इति, दुःखमिश्रितत्वात् सुखमपि दुःखमेवेति वाचस्पतिमिश्रवचोऽनुरोधाच्च यद्यपि सुखात्मकस्यापि रसस्योभयात्मकत्वं वक्तुं शक्यम्, तथाप्युत्तरदशायां यदनुभवः तेनैव सर्वो रसो व्यपदेश्यः । आनन्दः सुखं वा अन्तःकरणे अनुभूयते । शृङ्गारहास्यादयो भवन्तु, करुणरौद्रादयो वा भवन्तु, तत्तद्रसोद्भवेन निर्मलान्तःकरणे याऽनुभूतिः सा सुखात्मिकैवेति सर्वो रसः सुखात्मकः इति प्रतीमः, सुखस्यानुकूलवेदनीयत्वात् तदानीञ्चानुकूल्यानुभूतेः ।। - स.)

"रसभावाभिनयगाः" अर्थात् वृत्तयः रसानां भावानाम् अभिनयानाञ्च अनुसरणं कुर्वन्ति । तत्र तावत् रसानां वर्णनम् आवश्यकम् अस्ति । रसानां स्वरूपनिरूपणे नाट्यदर्पणकारो ब्रूते यत् -

**स्थायिभावः श्रितोत्कर्षो विभावव्यभिचारिभिः ।**
**स्पष्टानुभावनिश्चेयः सुखदुःखात्मको रसः ॥**
**कार्यहेतुः सहचारी स्थाय्यादेः काव्यवर्त्मनि ।**
**अनुभावो विभावश्च व्यभिचारी च कीर्त्यते ॥[1]**

तात्पर्यमस्ति ललनादिरूपात् आलम्बनविभावात् उद्यानाद्युद्दीपनविभावाच्च आविर्भूतैः व्यभिचारिभावैः रसिकानां मनःस्थितैः हर्षमदगर्वादिभावैः परिपुष्टैः कटाक्षभुजक्षेपादिरूपैः कार्यभूतैरनुभावैः उपचितो निर्णीतो वा रत्यादिस्थायिभावः यदा भावैः एभिः उत्कर्षमाप्नोति अर्थात् प्राधान्येन अभिव्यक्तो भवति तदा सामाजिकैरनुभूयमानां दशां प्राप्तः सुखदुःखात्मकः स्थायिभावः एव रसः इति पदेन व्यवह्रियते । भरतमुनेरारभ्य सर्वैरप्याचार्यैः सर्वेऽपि रसाः सुखात्मकाः एव स्वीकृताः परमाभ्यामुच्यते यत् न हि सर्वे रसाः सुखस्वरूपाः ।



Scanned with CamScanner

द्विविधाः रसाः - सुखात्मकाः दुःखात्मकाश्च अवगन्तव्याः । तदुक्तम् विवृत्यां यथा - "सुखदुःखस्वभावो रस्यते आस्वाद्यत इति रसः । तत्रेष्टविभावादिप्रथितस्वरूपसम्पत्तयः शृङ्गार-हास्यवीराद्भुतशान्ताः पञ्च सुखात्मानः, अपरे पुनरनिष्टविभावाद्युपनीतात्मानः करुणरौद्रबीभत्स-भयानकाः चत्वारः दुःखात्मानः । यत् पुनः सर्वरसानां सुखात्मकत्वमुच्यते तत् दुःखात्मकप्रतीत्या बाधितम्" ।[2]

परमेतद्विचारणीयं यत् दुःखात्मकेषु रसेषु कथं सहृदयानां प्रवृत्तिः स्यादिति शङ्कायां ताभ्यामुच्यते यत् कवेः अभिनेतुर्वा नैपुण्येन चमत्कृताः सहृदयाः तान् रसान् प्रति प्रवर्त्तन्ते । यथोक्तं नाट्यदर्पणकाराभ्यां अनेनैव च सर्वाङ्ग-आह्लादकेन कविनटशक्तिजन्मना चमत्कारेण विप्रलब्धाः परम् आनन्दरूपतां दुःखात्मकेष्वपि करुणादिषु प्रतिजानते । एतदास्वाद-लौल्येन प्रेक्षका अपि एतेषु प्रवर्त्तन्ते ।[3]

नाट्यदर्पणे एव एतदप्युक्तं यत् नाट्यम् अभिनयन्तः अभिनेतारः तं रसम् अनुभवितुं शक्नुवन्ति यं रसं ते सहृदयान् अनुभावयितुं प्रवर्तन्ते यथा गणिकारतिसुखमनुभवति तथैव ते तद्रसम् अनुभवन्ति । यथोक्तं विवृत्याम् -

"पण्यस्त्रियो धनलोभेन पररत्यर्थं रत्यादि विपञ्चम-यन्त्यः कदाचित् स्वयम् अपि परां रतिम् अनुभवन्ति । गायकाश्च परान् रञ्जयन्तः स्वयम् अपि रज्यन्ते । एवं नटोऽपि रामादिगतं विप्र-लम्भादि-अनुकुर्वाणः कदाचित् स्वयमपि तन्मयीभावम् उपयाति इत्येव ।

रसानाम् अलौकिकतया सह तेषां सुखदुःखतायाः प्रश्नोऽपि साहित्यिकानां कृते एकः विवेचनीयः विषयः अस्ति । अस्मिन् विषये प्रायः त्रीणि मतानि सन्ति । मम्मट-धनिक-धनञ्जय-विश्वनाथ-जगन्नाथाः तु रसाः नितान्तं सुखरूपाः आनन्दमयाः सन्ति इति ब्रुवते । एतैस्तु करुणरस-स्यापि सुखात्मकत्वम् एव उच्यते । यथोक्तं विश्वनाथेन साहित्यदर्पणे -

**करुणादावपि रसे जायते यत्परं सुखम् ।**
**सचेतसामनुभवः प्रमाणं तत्र केवलम् ॥**
**किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः ।**
**तथा रामायणादीनां भविता दुःखहेतुता ॥**[4]

विश्वनाथादयः रसस्य सुखात्मकतावादिनः ते हि तर्कत्रयं समुपस्थापयन्ति तद्यथा - काव्यस्य रसात्मिका अनुभूतिः आनन्दमयी भवति । सा च अलौकिकी अस्ति । सहृदयानान्तु शृङ्गारादीनाम् इव करुणादिषु अपि आनन्दानुभूतिः जायते । लोके कारणानि कार्याणि सहकारीणि यानि च तत्त्वानि भवन्ति, तानि (समाश्रित्य) नाट्ये अलौकिकविभावानुभावव्यभिचारिभावाः सम्पद्यन्ते । तेषां च व्यक्तिगतः अंशः तिरोहितो जायते तेन तेषां दुःखप्रदता न भवति ।[5]

काव्यगतरसानाम् अनुभूतिः सत्त्वप्रधाना भवति रसः इतरान् सर्वान् अपि वेद्यान् तिरोधत्ते । रसः ब्रह्मास्वादसहोदरो भवति ।[6] रसानुभूतिः तु इतराभ्योऽनुभूतिभ्यः विलक्षणा भवति ।

पाश्चात्यकाव्यशास्त्रिण: अपि रसान् आनन्दरूपान् प्रतिपादयन्ति । अस्मिन् सम्बन्धे अरस्तू इत्यभिधस्य काव्यशास्त्रिण: विरेचनसिद्धान्त: प्रसिद्ध: । तदनुसारं सन्त्रासानन्तरम् उत्तेजनया मनोवेगा: उपशान्ता: भवन्ति अर्थात् विरेचिता: भवन्ति । करुणत्रासादिभावानां कटुत्वं व्यपगच्छति तेन च मनसो वैशद्यं शान्तिश्च जायते । तस्मात् सहृदया: प्रसन्नमनस्का: भवन्ति । तथैव बुचर: कथयति यत् शोकादिस्थायिभावानां कटुत्वं तावत्कालपर्यन्तम् एव भवति, यावत् ते वैयक्तिकभौतिकसीम्नि निबद्धा भवन्ति । सीम्नो नाशानन्तरं कटुत्वम् अपि नष्टं भवति । तेन च आनन्दावाप्ति: भवति ।

प्रसिद्धो दार्शनिक: काण्ट:, कलावादिनौ समीक्षकौ रोजरफ्राइक्लाइववेल् इत्येतौ कलागताम् अनुभूतिं सर्वथा अलौकिकीं मन्वाते । तेन अलौकिकत्वात् रसानां सुखात्मकत्वम् अस्तीति वदत: ।

आधुनिकभारतीयसमीक्षक: डॉ. नगेन्द्र: अपि सुखदु:खात्मकत्वे विशिष्टं मतम् अतिष्ठिपत्। तस्य अनुसारं सर्वेषु अपि रसेषु आनन्दात्मिका अनुभूतिर्भवति । अनुभूतिर्द्विविधा भौतिकी आध्यात्मिकी चेति । आध्यात्मिकी अनुभूति: भौतिक्या: अनुभूते: भिन्ना अतिपरिष्कृता सती केवलम् आनन्दात्मिका एव भवति ।

किन्तु अभिनवगुप्तेन रस: उभयात्मक: मन्यते अर्थात् प्रत्येकस्मिन् रसे सुखस्य दु:खस्य चेत्युभयोरपि समावेशो भवति किन्तु एतेषु शृङ्गारहास्यवीराद्भुतेषु सुखस्य प्राधान्यं भवति सहैव दु:खस्य अनुबोध: भवति । एतद्विपरीतं रौद्रभयानककरुणबीभत्सेषु दु:खस्य प्राधान्यं भवति सुखस्य चानुबोध: भवति । शान्त एव एकाकी रस: य: सुखात्मक एव । एष विषय: अभिनवगुप्तेन अभिनवभारत्या: प्रथमे अध्याये विस्तरेण प्रतिपादित: ।

नाट्यदर्पणकारयो: रामचन्द्रगुणचन्द्रयो: मतम् एतयो: द्वयोरपि मतयो: भिन्नम् अस्ति । मतमिदं वयं विभाज्यवादिन: मतम् इति वक्तुं शक्नुम: । विश्वनाथादय: सर्वानपि रसान् सुखात्मकान् कथयन्ति, अभिनवगुप्तश्च सर्वान् अपि रसान् उभयात्मकान् ब्रूते, किन्तु रामचन्द्रगुणचन्द्रयो: मते न तु सर्वे रसा: सुखात्मका: न वा सर्वे सुखदु:खोभयात्मका: सन्ति । अपितु तेषां रसानां द्विधा आभ्यां विभाग: कृत: । केचन रसा: तत्र केवलं सुखात्मका: केचन च केवलं दु:खात्मका: सन्ति । यथा शृङ्गारहास्यवीराद्भुतशान्ता: रसा: केवलं सुखात्मका:, करुणरौद्रबीभत्सभयानका: चत्वार: रसा: सर्वथा दु:खात्मका: सन्ति । यथोक्तं ताभ्याम् -

**तत्रेष्टविभावादिप्रथितस्वरूपसम्पत्तय: शृङ्गारहास्यवीराद्भुतशान्ता: पञ्च सुखात्मानोऽपरे पुनरनिष्टविभावाद्युपनीतात्मान: करुणरौद्रबीभत्सभयानका: चत्वार: दु:खात्मान: इति ।**[7]

न केवलम् एतावता एव, आभ्याम् अभिनवगुप्तस्य उभयात्मकतावादस्य अथ च विश्वनाथादीनां सुखात्मकतावादसिद्धान्तस्य अपि स्पष्टतया खण्डनं विहितम्, एकान्तसुखात्मकतावादस्य खण्डनं कर्तुम् ऊचतु: यत् -

"यत् पुन: सर्वरसानां सुखात्मकत्वम् उच्यते तत् प्रतीतिबाधितम् । आस्तां नाम मुख्यविभावोपचित: काव्याभिनयोपनीतविभावोपचितोऽपि भयानको बीभत्स: करुणो रौद्रो वा

रसास्वादवताम् अनाख्येयां कांमपि क्लेशदशामुपनयति । अत एव भयानकादिभिः उद्विजते समाजः। न नाम सुखास्वादात् उद्वेगो घटते"।[8]

तात्पर्यमस्ति यत् सर्वेषाम् अपि रसानां कैश्चित् सुखात्मकत्वम् एव उच्यते तत्तु प्रत्यक्षम् अनुभूयमानया दुःखात्मकप्रतीत्या बाधितम् एव । एतच्चिन्तनीयं यत् भयानककरुणरौद्रबीभत्सेभ्यः रसेभ्यः सामाजिकाः अवर्णनीयां काञ्चित् क्लेशदशाम् अनुभवन्ति । क्लेशदशावशात् एव भयानकादिभ्यो रसेभ्यः समाजः उद्विजते । सुखास्वादात् कथम् उद्वेगस्य सिद्धिः भवति । उद्वेगस्तु दुःखास्वादात् एव तेन न एतेषां चतुर्णां रसानां सुखात्मकत्वम् इति ।

इत्थमेताभ्याम् आचार्याभ्यां केषाञ्चन रसानां सुखात्मकत्वं केषाञ्चन च दुःखात्मकत्वमस्तीति उपस्थापितम् । रसानां सुखदुःखात्मकत्वस्य मतं केवलं नाट्यदर्पणकारयोरेव न अपितु ततोऽपि पूर्वम् अभिनवगुप्तेन अभिनवभारत्यां कस्यचित् प्राचीनस्य आच्चार्यस्य मतत्वेन उल्लिखितम् । तस्य मतस्य अनुसारम् अपि रसानां सुखदुःखात्मकत्वम् आसीत् । रुद्रभट्टोऽपि रसकलिकायाम् एतस्य मतस्य समर्थनं कृतवान् । भोजश्च शृङ्गारप्रकाशे रसानां सुखदुःखात्मकत्वं स्व्यकार्षीत् । वामनोऽपि करुणरसवत्सु नाटकेषु जनानाम् उभयात्मिका अनुभूतिः भवति इति ब्रूते । प्रसिद्धः अद्वैतवेदान्ती आचार्यमधुसूदनसरस्वती अपि नाट्यदर्पणकारयोः मतं समर्थयामास । इत्थं रसानां सुखदुःखात्मकत्वे केवलम् एतयोर्नाट्यदर्पणकारयोरेव मतं नास्ति इत्यपि विदितं भवति ।

**सन्दर्भाः**


1. नाट्यदर्पणः 3.7-8
2. स्वोपज्ञनाट्यदर्पणविवृतिः 3.7
3. नाट्यदर्पणविवृतिः 3.7
4. साहित्यदर्पणः 3.4-5
5. काव्यप्रकाशः - 4.27-28
6. सत्वोद्रकादखण्डस्वप्रकाशानन्दचिन्मयः ।<br>वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः ।। साहित्यदर्पणः 3.2
7. स्वोपज्ञनाट्यदर्पणविवृतिः 3.7
8. स्वोपज्ञनाट्यदर्पणविवृतिः 3.7



अनुस्नातकभवनाध्यक्षा,<br>
श्रीसोमनाथसंस्कृतविश्वविद्यालयः,<br>
वेरावलम् (गुजरातम्) ।


★★★



Scanned with CamScanner